# संस्कृत-वार्ता:

दिनाङ्क : 19/02/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना वैश्विक-दक्षिणस्य सशक्तीकरणाय ए. आई. इत्यस्य लोकतान्त्रिकरणाय च आह्वानम् कृतम्। सः नवदिल्ल्याम् अनेकेषां वैश्विक-नेतृणां उपस्थितौ भारत-ए. आई. इंपैक्ट-शिखरसम्मेलनं उद्घाटितवान्।
- प्रधानमन्त्री नैतिक-समावेशी-ए. आई. इत्यस्य कृते 'मानव' दूरदृष्टिम् उद्घाटितवान्। उक्तं च यत् ए. आई. केवलं तदा एव विश्वाय लाभं प्रादास्यति यदा तस्य आदानप्रदानं भविष्यति।
- फ़्रान्स्-देशस्य राष्ट्रपतिः इम्मैनुअल मैंक्रो-वर्यः भारतस्य डिजिटल्-आधारित-संरचनायाः प्रशंसाम् अकरोत् यत् संसारे अतुल्यम् इति।
- मुङ्गेर्-नगरे अन्तिमशस्त्रधारिणः माओवादिनः आत्म-समर्पणानन्तरं बिहारराज्यं नक्सल्-मुक्तम् अभवत्।
- सर्वोच्चन्यायालयेन उक्तं यत्, निःशुल्क-दान-व्यवस्था आर्थिकविकासे बाधां जनयति; राज्यानि वृत्यावसराणां मार्गान् उद्घाटयन्तु इत्युक्तम्।
- आई. सी. सी. पुरुषाणां विंशतिं-प्रति विंशति क्रिकेट्-विश्वचषक- स्पर्धायां, भारतेन सह शीर्ष-अष्ट-दलानां निर्णयः अभवत्।

---

<u>प्रधानमन्त्री-ए. आई.</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना ए. आई. इत्यस्य लोकतान्त्रिकरणस्य उपरि बलं प्रदत्तं यत् एतत् विशेषतः वैश्विक-दक्षिणस्य कृते समावेशस्य सशक्तीकरणस्य च साधनं भवितव्यम् इति। नवदिल्ल्याः भारतमण्डपे अनेकेषां वैश्विक-नेतृणां उपस्थितौ षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य इण्डिया-ए. आई. इम्पैक्ट-शिखर-सम्मेलनस्य उद्घाटनं कुर्वन् श्रीमोदी अवदत् यत्, जगतः एकस्मिन् युगे प्रविशति यत्र मानवाः बुद्धिशालिनः व्यवस्थाः च

सहनिर्माणं, सहकार्यं, सहविकासं च कुर्वन्ति। सः अवदत् यत्, ए. आई. इत्यनेन कार्यं इतोपि स्पष्टम्, अधिकं दक्षम्, अधिकं प्रभावपूर्णं च भविष्यति।

श्रीमोदी अवदत् यत्, भारतं न केवलं नूतन-तन्त्रज्ञानस्य विकासं करोति अपितु तत् द्रुतगत्या स्वीकरोति। सः अवदत् यत्, भारतं विश्वस्य बृहत्तमस्य टेक्निक्-पूल इत्यस्य केन्द्रम् अस्ति। सः अवदत् यत्, नवदिल्ल्यां ए. आई. शिखरसम्मेलनस्य आयोजनं भारतस्य वैश्विक-दक्षिणस्य च कृते गौरवस्य विषयः अस्ति इति। प्रधानमन्त्रिणा उक्तं यत्, मानव-इतिहासे कतिपय परिवर्तन-बिन्दवः सन्ति ये सम्पूर्णशताब्दम् आकारं दत्तवन्तः।

श्रीमोदी अवदत् यत् **मानव** ए. आई.-नैतिकं तथा नैतिक-प्रणालीं, उत्तरदायि-शासनं, राष्ट्रियं सम्प्रभुता, सुलभं तथा सर्वसमावेशी, वैधं च दृषटिकोणम् अस्ति। सः अवदत् यत् भारतस्य **मानव** इति एकविंशति शताब्द्याः ए. आई.-चालिते विश्वे मानव-कल्याणाय दूरदृष्टिः महत्त्वपूर्णः सम्पर्कः भविष्यति।

प्रधानमन्त्री मोदी अवदत् यत् भारतं सेमिकण्डक्टर्स् तथा चिप्- निर्माणेन सहैव क्वाण्टं-कम्प्यूटिङ्ग् पर्यन्तं स्थितिस्थापक-व्यवस्थायाः निर्माणं कुर्वन् अस्ति। सुरक्षित-दत्तांश-केन्द्राणि, सुदृढ-आई. टी. इत्यस्य मेरुदण्डः, गतिशील-स्टार्ट-अप्स पर्यावरणं च भारतं सुलभस्य, मापनीयस्य, सुरक्षितस्य च ए. आई. इत्यस्य समाधानस्य प्राकृतिकं केन्द्रं करोति इति सः दृढीकृतवान्।

कार्यक्रमं संबोधयन् फ़्रान्स-देशस्य राष्ट्रपतिः इम्मैनुअल मैंक्रो वर्यः अवदत् यत्, भारतेन यत् किमपि निर्मितं तत् विश्वस्य अन्येन देशेन न निर्मितम्। **संयुक्तराष्ट्रसङ्घस्य महासचिवः एन्टोनियो गुट्टरेसः अवदत् यत्,** ए. आई. प्रत्येकस्य जनस्य कृते अस्ति" इति। सः अवदत् यत्, ए. आई. इत्यस्य भविष्यं कतिपयैः देशैः निर्धारयितुं न शक्यते। शिखरसम्मेलने उपस्थितानां विश्वनेतृणां स्वागतं कुर्वन् केन्द्रीय-इलेक्ट्रानिक्स् तथा सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत्, सर्वकारः ए. आई. स्टैक इत्यस्य पञ्चस्तरेषु कार्यं कुर्वन् अस्ति।

पश्चात् प्रधानमन्त्रिणा शिखरसम्मेलने नेतृणां पूर्णसम्मेलनं सम्बोधितम्। सः अवदत् यत् ए. आई. तन्त्रज्ञानं सर्वेभ्यः सुलभं भवेत् तथा च प्रत्येकराष्ट्रस्य लक्ष्यं भवेदिति। सः अवदत् यत्, ए. आई. इत्यस्य कृते स्पष्टमानव-मूल्यानां मार्गदर्शनस्य च आवश्यकता वर्तते। सः अवदत् यत्, कृत्रिम बुद्धिमत्ता इत्यस्य वैश्विकयात्रायां एस्पिरेशनल-भारतस्य महती भूमिका अस्ति। श्रीमोदी अवदत् यत्, इतिहासं पश्यामः चेत् मनुष्येन प्रत्येकं विघ्नं नूतनावसर-रूपेण परिवर्तितम्। कृत्रिम बुद्धिमत्तायाः नैतिक-उपयोगस्य विषये प्रधानमन्त्रिणा त्रीणि महत्त्वपूर्णानि उपायानि प्रदत्तानि।

---------------------------------------------------

## बिहार-नक्सल- मुक्तम्

बिहार-राज्यं नक्सल्-प्रभावेभ्यः मुक्तम् इति घोषितम्। मुङ्गेर्-नगरे अन्तिमस्य सशस्त्रस्य माओवादिनः सुरेशकोडा इत्यस्य आत्मसमर्पणानन्तरं राज्यं एतत् महत्त्वपूर्णं लक्ष्यम् अवाप्नोत्। मुङ्गेर्-क्षेत्रस्य डी. आई. जी. इति आरक्षक-उप-महानिरीक्षकः राकेश-कुमारः अवदत् यत् पूर्वं नक्सलवादेन प्रभावितेषु त्रयोविंशति मण्डलेषु कस्मिन् अपि सशस्त्रः नक्सल-दलं सम्प्रति सक्रियः नास्ति इति। मुङ्गेरस्य मण्डल-दंडाधिकारी निखिल-धनराज-निप्पनिकरः अवदत् यत् केन्द्रसर्वकारस्य आत्मसमर्पण-पुनर्वसन-नीत्यानुसारं सुरेशकोडा इत्यस्मै शीघ्रमेव विहितानि लाभानि प्रदीयन्ते। अत्रान्तरे, सुरेशकोडा इत्यस्य पत्नी प्रमिला देवी, तस्य आत्मसमर्पणस्य निर्णयस्य विषये प्रसन्नतां प्रकटयन्ती, उक्तवती यत् इदानीं कुटुम्बे शान्तिःआनन्दश्च अनुभूयते। द्वादशाधिक द्विसहस्रतमे वर्षे बिहारस्य त्रयोविंशति मण्डलानि नक्सल-क्रियाकलापैः प्रभावितानि आसन्। सप्तत्यधिक ऊनविंशतितमे दशके राज्ये नक्सल्-प्रभावः महत्त्वपूर्णरूपेण वर्धितः आसीत्, येन मध्य-बिहारस्य मण्डलानि सर्वाधिकानि प्रभावितानि आसन्। केन्द्र-राज्य-सर्वकारयोः निरन्तर-प्रयासेभ्यः पञ्चविंशत्यधिक द्विसहस्रतमे वर्षे एकमपि नक्सल-घटनायाः सूचना न प्राप्ता। तस्मिन् एव वर्षे विंशत्यधिक द्विशत नक्सल्वादिनः गृहीताः, येन राज्ये शान्तेः विकासस्य च प्रमुखं साफल्यम् अनुभूतम्।

---------------------------------------------------

## सर्वोच्चन्यायालयः-निःशुल्कदान-संस्कृतिः

सर्वोच्चन्यायालयेन अद्य उक्तं यत् निःशुल्कदान-संस्कृतिः देशस्य आर्थिकविकासाय बाधां जनयति इति। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्तिः जोयमल्या बागची, विपुल एम पञ्चोली च इत्येतेषां पीठेन उक्तं यत्, देशस्य अधिकांशेषु राज्येषु राजस्व-न्यूनता वर्तते, तथापि ते विकासस्य अवहेलनं कुर्वन्तः एतादृशानि निःशुल्क-उपहाराणि वितरन्ति। सर्वोच्चन्यायालयः तमिळुनाडु-विद्युत्-वितरण-निगम-लिमिटेड् इत्यस्य याचिकायां प्रवदन् आसीत्, यस्मिन् उपभोक्तॄणां वित्तीय-स्थितेः अध्ययनं विनैव सर्वेभ्यः निःशुल्क-विद्युदुत्-वितरणस्य प्रस्तावः आसीत्। न्यायपीठेन उक्तं यत्, सर्वेभ्यः निःशुल्कं भोजनं, द्विचक्रिका, विद्युतं च न दत्त्वा, राज्यानि वृत्यावसराणां मार्गान् उद्घाटयितुं कार्यं कुर्युः।

-----------------------------------------------

## <u>क्रिकेट्</u>

आई. सी. सी. पुरुषाणां विंशतिं-प्रति विंशति क्रिकेट्-विश्वचषक- स्पर्धायां, भारतेन सह शीर्ष-अष्ट-दलानां निर्णयः अभवत्।

।। इति वार्ताः ।।